# संस्कृत-वार्ता:

**दिनाङ्क :- 17.08.2024** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य तृतीय ‘ग्लोबल साउथ वर्चुअल सम्मिट’ इति सम्मेलनस्य औद्घाटानिके वक्तव्ये वैश्विक-दक्षिण-देशानाम् आह्वानम् अकरोत् यत् ते सम्भूय कार्याचरण-पूर्वकं परस्परं सहायकीभूता: भवन्तु।

- केन्द्रीयस्वास्थ्यन्त्रालयेन प्रोक्तं यत् देशे अद्यावधि ‘मङकीपॉक्स’ इति सङक्रमण रोगस्य किमपि प्रकरणं नास्ति अभिज्ञातं प्रकटितं च।

- अन्ताराष्ट्रीय-पृथ्वी-विज्ञान ओलिम्पियाड प्रतिस्पर्धायां भारतीय-छात्रदलेन त्रीणि स्वर्णपदकानि, द्वे रजतपदके, त्रीणि कांस्यपदकानि च विजितानि।

- पेरिस-पैरालिम्पिक इत्यस्य उद्घाटन-समारोहे टोक्यो-पैराओम्पिकस्य स्वर्ण-पदकविजेता सुमित-अंतिल: अथ ‘शॉट पुट’ इति क्रीडाया: तारिका भाग्यश्री जाधव: च भारतीयदलस्य ध्वजवाहकौ भवितारौ।

<><><>

**प्रधानमन्त्री वैश्विक दक्षिणा भासीय सम्मेलनम् (HL-1)**

प्रधानमन्त्री श्रीनरेन्द्र मोदी अद्य तृतीय ‘ग्लोबल साउथ वर्चुअल सम्मिट’ इति सम्मेलनस्य औद्घाटानिके वक्तव्ये वैश्विक-दक्षिण-देशानाम् आह्वानम् अकरोत् यत् ते सम्भूय कार्याचरण-पूर्वकं परस्परं सहायकीभूता: भवन्तु। प्रधानमन्त्रिणा वर्तमान-वैश्विक-वातावरणे अनिश्चिततानां, समाह्वानानां, समस्यानाञ्च विषयेऽपि चिन्ता प्रकटीकृता। अमुना भणितं यत् विश्वम् अधुना यावत् कोविड-दुष्प्रभावात् पूर्णतोदृशा नैव सुरक्षितं समुद्धृतं चास्ति। अथ चानेन साकमेव संघर्षस्य परिस्थितिश्चापि वैश्विक-दक्षिण-देशानां विकास-यात्रायां महत्वपूर्ण-समाह्वानम् उत्पादयति। श्रीमोदिना प्रोदितं यत् इमे देशा: जलवायु-परिवर्तनं समेत्य स्वास्थ्यं, भोजनं, ऊर्जापूर्ति: सुरक्षा चेति समाह्वानानामपि साम्मुख्यं कुर्वन्तो वर्तन्ते। प्रधानमन्त्रिणा आश्वासितं यत् भारतं निजानुभवै: सामर्थ्येन च वैश्विक-दक्षिणस्य समेषामपि देशानां

सहायतार्थं सर्वदा तत्परमस्ति। अमुना प्रोदीरितं यत् सद्यस्तनेषु वर्षेषु आधारिक-संरचना, अङ्कीय-व्यवस्थापनं, ऊर्जासम्पर्क-समेधनं चेति मध्यमैः वैश्विक-दक्षिण-सहयोग-समावलम्बनमेधितम् अस्ति। श्रीमोदना प्रतिपादितं यत् 'मिशन लाइफ' इत्यभियानान्तर्गतं नवदिल्ली केवलं भारते एव नैव प्रत्युत मित्र-देशानां गृहाणां छदिषु अपि सौरोर्जोत्पादनं नवीकरणीयोर्जा-समुत्पादनञ्च प्राथम्येन समाचरति। भाषणस्य अवसाने श्रीमोदिना प्रत्यपादि यत् अद्यतन-चर्चाभिः सम्भूय युगपदेव अग्रे वर्धनस्य मार्गः प्रशस्तीभूतः अस्ति। अमुना आशास्तं यत् एषः सामूहिको विमर्शः वैश्विक दक्षिण-देशैः निर्धारित-लक्ष्याणां प्राप्तये विहितान् प्रयासान् सफलयिष्यति।

**मङ्कीपॉक्स सङ्क्रमणम् (HL-2)**

केन्द्रीयस्वास्थ्यन्त्रालयेन प्रोक्तं यत् देशे अद्यावधि 'मङ्कीपॉक्स' इति सङ्क्रमण रोगस्य किमपि प्रकरणं नास्ति अभिज्ञातं प्रकटितं च। विश्वस्वास्थ्य संघटनेन 'मङ्कीपॉक्स' इति सङ्क्रमालक्ष्य अन्ताराष्ट्रिय-स्तरे चिन्ता-प्रकाशनपूर्वकं समग्रे विश्वे जनस्वास्थ्य-सुरक्षा-दृशा स्थ्यापात्कालस्य घोषणा विहिता अस्ति। केन्द्रीय स्वास्थ्यमन्त्रिणा जे.पी. नड्डा वर्येण अद्य नवदिल्ल्याम् एकस्मिन उपवेशने अस्य सङ्क्रमण रोगस्य प्रसारं निवारयितुं नियन्त्रयितुं च अनेकोपायानां प्रवर्तनस्य निर्णयो विहितः।

**कोलकाता-दुष्कर्म-प्रकरणम् (HL-3)**

कोलकातायां आर.जी. कर राजकीय चिकित्सालये एकस्याः महिलाचिकित्सिकायाः दुष्कर्मानन्तरं बर्बर-रीत्या विहित-हत्यायाः विरोधे भारतीय-चिकित्सा-संघेन अद्य चतुर्विंशतिः होराः यावत् देश-व्यापि-कार्यविरामस्य आह्वानं कृतम् अस्ति। आई.एम.ए. इति संघेन अद्य प्रातः षड् वादने ओ.पी.डी. सहिताः अन्याश्चापि चिकित्सा-सेवाः पिधातुं सर्वे चिकित्सकाः समाकारिताः आसन्। संघटनेन विषयेऽस्मिन् सजवं न्यायाभियाच्ञा-पूर्वकं स्वास्थ्य-कर्मकराणां सुरक्षार्थं केन्द्रीय-कठोर-विधिः अभियाचितो वर्तते। संघटनस्य अभियाचनां निध्याय अस्मिन् कर्मविरामे प्रशासनेतर-क्षेत्राणां चिकित्सकाः अपि सहभूताः सन्ति। अनेन कर्म-विरामाचरणेन बिहारे स्वास्थ्य-सौविध्यं भृशं दुष्प्रभावितम् अस्ति। राज्ये चिकित्सा-महाविद्यालयस्य कनिष्ठाः वरिष्ठाश्च चिकित्सकाः कार्यस्थलेषु एव कर्म-विरामान्दोलने निरताः सन्ति। अत्रान्तरे केन्द्रीय स्वास्थ्यमन्त्रालयेन आन्दोलनरताः चिकित्सकाः आश्वासिताः यत् सर्वकारः तेषां

सुरक्षायै पूर्णतो-दृशा यथाशक्यं कार्यं करिष्यति। अथ च मन्त्रालयेन चिकित्सका: अध्यर्थिता: यत्ते जनानां स्वास्थ्य-दृशा निजम् आन्दोलनं समाप्य पुन: कर्मरता: भवेयु:।

**चीन (HL-4)**

चीन-देशस्य पेइचिंग-नगरे समायोजितायां सप्तदश्याम् अन्ताराष्ट्रीय-पृथ्वी-विज्ञान ओलिम्पियाड प्रतिस्पर्धायां भारतीय-छात्रदलेन त्रीणि स्वर्णपदकानि, द्वे रजतपदके, त्रीणि कांस्यपदकानि च विजितानि। ओलिम्पियाड प्रतिस्पर्धाया: आयोजनं अगस्त-मासस्य अष्टमी-त: षोडशीं यावत् अजायत। पृथ्वी-विज्ञान-राज्यमन्त्री डॉ. जितेन्द्र सिंह: भारतीय छात्राणां विजयमभिलक्ष्य समग्रदलाय मंगलवचोभि: वर्धापनानि अयच्छत् सममेव प्रसन्नताम् अपि अभिव्यक्तवान्।

**पेरिस पैरालिंपिक (HL-5)**

पेरिस-पैरालिम्पिक इत्यस्य उद्घाटन-समारोहे टोक्यो-पैरालिम्पिकस्य स्वर्ण-पदकविजेता सुमित-अंतिल: अथ 'शॉट पुट' इति क्रीडाया: तारिका भाग्यश्री जाधव: च भारतीयदलस्य ध्वजवाहकौ भवितारौ। अवधेयं यत् पैरालिम्पिक क्रीडा अगस्त-मासस्य अष्टाविंशति: दिनाङ्कात् आरभ्य सितम्बर-मासस्य अष्टमीं यावत् भविष्यति। एतासु क्रीडासु चतुरशीति: क्रीडका: भारतं प्रतिनिधास्यन्ति।

**पैरा**

पैरालिम्पिक क्रीडायां अद्यावधि देशस्य बृहत्तमं दलम् एतद् एव। टोक्यो पैरालिम्पिक क्रीडायामाहत्य चतु: पञ्चाशत् क्रीडका: देशस्यास्य प्रतिनिधित्वम् अकुर्वन्।

**विदेशमन्त्री-वैश्विकदक्षिणदेशसम्मेलनम्**

विदेशमन्त्री डॉ. एस. जयशंकर: वैश्विक-दक्षिण-देशान् एककुटुम्बत्वेन कार्यं कर्तुम अध्यार्थयत्। येन अल्पमूल्य-युक्त-वित्तपोषणधारा, प्रौद्योगिकी च सुतरां प्रवाहिता स्यात्। तृतीय-वैश्विक-दक्षिण-देश-सम्मेलनस्य विदेश-मन्त्रिणां सत्रे सम्भाषमाण: डॉ. जयशंकर: प्रावोचत् यत्-एतेषु देशेषु परित: जायमानानां भूरि संघर्षणां, अपीडानां, अन्यासां समस्यानाञ्च विशेष: प्रभावो जायते। अमुना अस्य सम्मेलनस्य उद्देश्य: एतेषां देशानां हितकार्याणां परिभाषीकरणमस्ति इति प्रतिपादितम्।

## कर्णाटक-राज्यपाल:

कर्णाटकस्य राज्यपालेन श्रीथावरचन्द्र-गहलोतेन अद्य मैसुरू-पौर-विकास-प्राधिकरणस्य भूमि आवंटन-प्रवञ्चना-प्रकरणे मुख्यमन्त्रिणं सिद्धारमैया-वर्यं विरुध्य प्रकरण-चालनस्य अनुमति: प्रदत्ता। एषा अनुमति: टी.जे. अब्राहनस्य, प्रदीपस्य, स्नेहमयी कृष्णस्य च याचिका: सन्दृभ्य प्रदत्ता वर्तते। याचिकासु प्रोक्तमस्ति यत् सिद्धारमैया-वर्येण निजाधिकाराणां दुरुपयोग-पुरस्सरं मैसुरू-पौर-विकास-प्राधिकरणस्य भूमि: निज-निकटस्थेभ्य: कौटुम्बिकेभ्य: जनेभ्य: आवण्टिता इति। अथ च मुख्यमन्त्रिणि इदमप्यारोप्यते यत् तेन त्रयोदशोत्तर-द्वि-सहस्रतम-वर्षीये नैर्वाचनिके विवरण-पत्रके एतासां सम्पत्तीनां विवरणमपि नैव प्रदत्तम् इति।

## मलयालीयं नववर्षम्

अद्य मलयालीय-नववर्षस्य प्रथम: दिवस: वर्तते। मलयालीय पञ्चाङ्गे नववर्षस्य प्रथम: मास: 'चिङगम' इत्युच्यते अवसरेऽस्मिन् आराज्ये पारंपरिक अनुष्ठानेन जना: नववर्षस्य चिङगम' मासस्य स्वागतं कुर्वन्ति।

## जम्मूकश्मीर-विधानसभानिर्वाचनम्,

संविधानस्य सप्तत्युत्तर-त्रिशत-तम्या: धाराया: निरसनानन्तरं जम्मू-कश्मीरे ऐदम्प्रथम्येन विधानसभानिर्वाचनम्, त्रिषु चरणेषु भविष्यति मतदानम्।

जम्मू-कश्मीरे सप्तत्युत्तर-त्रिशत-तम्या: धाराया: अपाकरणस्य पश्चात् आयोक्ष्यमाणं प्रथमं विधानसभा-निर्वाचनं त्रिषु चरणेषु सितम्बर-मासस्य अष्टादश्यां पञ्चविंश्यां तथा अक्तूबर-प्रथमायां च भविष्यति , तत्रैव हरियाणायां विधानसभा निर्वाचनं एकस्मिन्नेव चरणे अक्तूबर-प्रथमायां भविष्यति। उभयत्रापि मतगणना अक्तूबर-चतुर्थ्यां भविष्यति। मुख्यनिर्वाचनायुक्त: राजीवकुमार:, निर्वाचनायुक्त: ज्ञानेशकुमार: डा. सुखवीर सिंह संधू: च एकस्मिन् वार्ताहर-सम्मेलने जम्मूकश्मीरस्य बहुप्रतीक्षितानां निर्वाचनानां तिथीन् घोषितवन्त:। श्रीकुमार: प्रत्यपादयत् यत् नवति-सदस्यीयस्य-जम्मू-कश्मीर-विधानसभा-निर्वाचनस्य प्रथमे चरणे चतुर्विंशति: आसनानां कृते अधिसूचना श्रीअमरनाथतीर्थयात्राया: सम्पन्नताया: पश्चाद् अपरे दिने अगस्त विंश्यां प्रख्यापयिष्यते ।

**।। इति वार्ता:।।**